# ॥ सूर्य अष्टकम् ॥

श्री गणेशाय नमः

सांब उवाच

आदिदेवं नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तुते ॥ 1 ॥

सप्ताश्व रथं आरूढं प्रचण्डं कश्यप आत्मजम् ।
श्वेतपद्म धरं देवं तं सूर्यं प्रणमाम्यहम् ॥ 2 ॥

लोहितं रथं आरूढं सर्व लोक पितामहम् ।
महापाप हरं देवं तं सूर्यं प्रणमाम्यहम् ॥ 3 ॥

त्रैगुण्यं च महाशूरं ब्रह्मा विष्णु महेश्वरम् ।
महापाप हरं देवं तं सूर्यं प्रणमाम्यहम् ॥ 4 ॥

बृंहितं तेजः पुंजं च वायुं आकाशं एव च ।
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥ 5 ॥

बन्धूक पुष्प संकाशं हार कुंडल भूषितम् ।
एकचक्र धरं देवं तं सूर्यं प्रणमाम्यहम् ॥ 6 ॥

तं सूर्यं जगत् कर्तारं महातेजः प्रदीपनम् ।
महापाप हरं देवं तं सूर्यं प्रणमाम्यहम् ॥ 7 ॥

तं सूर्यं जगतां नाथं ज्ञान विज्ञान मोक्षदम् ।
महापाप हरं देवं तं सूर्यं प्रणमाम्यहम् ॥ 8 ॥

इति श्री सूर्याष्टकं संपूर्णम्